पौष्करसादिः । आनुहारतिः । कुरुकत गर्गादिः (४.१.१०५/११०७), [1]कौरुकात्यः । कुरुपञ्चाल – कुरुपञ्चालेषु भवः कौरुपाञ्चालः । जनपदसमुदायो [2]जनपदग्रहणेन न गृह्यते इति वुञ् [3]न भवति । उदकशुद्धस्य अपत्यम् औदकशौद्धिः । इहलोक, परलोक – तत्र भवः ऐहलौकिकः, पारलौकिकः । लोकोत्तरपदस्य इति ठञ् (वा. ४५९) । सर्वलोक – तत्र [4]विदितः सार्वलौकिकः । सर्वपुरुषस्य इदम् सार्वपौरुषम् । सर्वभूमेः निमित्तं संयोगः उत्पातो वा सार्वभौमः । प्रयोग – तत्र भवः प्रायौगिकः । परस्त्री – पारस्त्रैणेयः । ‘कुलटाया वा’ (४.१.१२७/११३२) इति इनङ् । ‘राजपुरुषात् ष्यञि’ (ग. सू. १७६) । राजपौरुष्यम् । ष्यञि इति किम् ? राजपुरुषस्य अपत्यम् राजपुरुषायणिः । ‘उदीचां वृद्धादगोत्रात्’ (४.१.१५७/११८१) इति फिञ् । [5]शतकुम्भसुखशयनादयः– शतकुम्भे भवः शातकौम्भः । सौखशायनिकः । पारदारिकः । सूत्रनडस्य अपत्यम् सौत्रनाडिः । आकृतिगणश्चायमिष्यते । तेन इदमपि सिद्धं भवति, अभिगमम‍र्हति आभिगामिकः । अधिदेवे भवम्[6]आधिदैविकम् । आधिभौतिकम् । चतस्र एव विद्याः चातुर्वैद्यम् । स्वार्थे ष्यञ् ।

अनुशतिक । अनुहोड । अनुसंवरण । अनुसंवत्सर । अङ्गारवेणु । असिहत्य । वध्योग । पुष्करसद् । अनुहरत् । कुरुकत । कुरुपञ्चाल । उदकशुद्ध । इहलोक । परलोक । सर्वलोक । सर्वपुरुष । सर्वभूमि । प्रयोग । परस्त्री । ‘राजपुरुषात् ष्यञि’ (ग. सू. १७६) । सूत्रनड । अनुशतिकादिः ॥

## देवताद्वन्द्वे च । (२१/१२३०)

देवताद्वन्द्वे च पूर्वपदस्य उत्तरपदस्य च अचामादेरचः स्थाने वृद्धिर्भवति तद्धिते ञिति, णिति, किति च परतः । [7]‘आग्निमारुतीं [8]पृश्निमालभेत’ (मै. २.५.७) । आग्निमारुतं कर्म[9] । यो देवताद्वन्द्वः सूक्तहविःसम्बन्धी, तत्रायं विधिः[10] । इह तु न भवति, स्कन्दविशाखौ देवते अस्य स्कान्दविशाखः । ब्रह्मप्रजापती – ब्राह्मप्रजापत्यम् ॥

## नेन्द्रस्य परस्य । (२२/१२४०)

इन्द्रशब्दस्य परस्य यदुक्तं तन् न भवति । सौमेन्द्रः । आग्नेन्द्रः । परस्य इति किम् ? ऐन्द्राग्नमेकादशकपालं चरुं निर्वपेत् । इन्द्रशब्दे द्वावचौ, तत्र तद्धिते[11] एकस्य ‘यस्येति च’ (६.४.१४८/३११) इति लोपः, अपरस्य पूर्वेण सह एकादेशः इत्यप्राप्तिरेव वृद्धेः, तदेदं प्रतिषेधवचनं ज्ञापकम्, बहिरङ्गमपि पूर्वोत्तरपदयोः पूर्वं कार्यं भवति पश्चादेकादेशः इति । तेन पूर्वेषुकामशमः इत्यादि [12]सिद्धं भवति ॥

## दीर्घाच्च वरुणस्य । (२३/१२४१)

दीर्घादुत्तरस्य वरुणस्य[13] यदुक्तं तन्न भवति[14] । ऐन्द्रावरुणम् । मैत्रावरुणम् (मै. २.१.७) । दीर्घात्

---

1. कौरकात्यः क. 2. जनपदेन क. इ. 3. न नास्ति क. 4. भवः इ. 5. शतकुम्भ – पारदारिकः नास्ति क. 6. आधिदैविकः आधिभौतिकः क. 7. आग्निवारुणीम् ब. 8. गृष्टिम् क, अनड्वाहीम् मुद्रितः पाठः 9. क्रियते । सा अस्य देवता इत्यण् प्रत्ययः इत्यधिकम् क. इ. 10. इति इत्यधिकम् इ. 11. कृते इत्यधिकम् ब. क. इ. 12. सिद्धिः इ. 13. देवताद्वन्द्वे इत्यधिकम् क. इ. 14. ञिति णिति किति च प्रत्यये परतः इत्यधिकम् इ.